# .. KarpUradistotra ..

# ॥ કર્પૂરાદિસ્તોત્રમ્ ॥

## Document Information

Text title : karpuuraadistotram
File name : karpuuraadi.itx
Location : doc_devii
Author : Traditional
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Mike Magee mike.magee at theregister.co.uk
Proofread by : Mike Magee mike.magee at theregister.co.uk
Latest update : August 23, 2000
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ કર્પૂરાદિસ્તોત્રમ્ ॥

ૐ
શ્રીગુરવે નમઃ । ૐ નમઃ પરમદેવતાયૈ ॥

શ્રીકર્પૂરાદિસ્તોત્રમ્
કર્પૂરં મધમાન્ત્યસ્વરપરિરહિતં સેન્દુવામાક્ષિયુક્તં બીજં તે
માતરેતત્ત્રિપુરહરવધુ ત્રિઃકૃતં યે જપન્તિ ।
તેષાં ગદ્યાનિ પદ્યાનિ ચ મુકુહુહરાદુલ્લસન્ત્યેવ વાચઃ
સ્વચ્છન્દં
ધ્વાન્તધારાધરુરુચિરુચિરે સર્વસિદ્ધિં ગતાનામ્॥ ૧॥

ઈશાન સેન્દુવામશ્રવણપરિગતો બીજમન્યન્મહેશિ દ્વન્દ્વં તે
મન્દચેતા યદિ જપતિ જનો વારૂમેકં કદાચિત્ ।
જિત્વા વાચામધીશં ધનમપિ ચિરં મોહયન્નમ્બુજાક્ષીવૃન્દં
ચન્દ્રાર્ધચૂડે પ્રભવતિ સ મહાઘોરબાલાવતંસે॥ ૨॥

ઈશો વૈશ્વાનરસ્થઃ શશધરવિલસદ્ વામનેત્રેણ યુક્તો બીજં તે
દ્વન્દ્વમન્યદ્ વિગલિતચિકુરે કાલિકે યે જપન્તિ ।
દ્વેષ્ટારં ઘ્નન્તિ તે ચ ત્રિભુવનમપિ તે વશ્યભાવં નયન્તિ
સૃક્કદ્વન્દાસ્રધારાદ્વયધરવદને દક્ષિણે ત્ર્યક્ષરેતિ॥ ૩॥

ઊર્ધ્વે વામે કૃપાણં કરકમલતલે છિન્નમુણ્ડં તથાધઃ સવ્યે
ચાભીર્વરં ચ ત્રિજગદઘહરે દક્ષિણે કાલિકે ચ ।
જપ્ત્વૈતન્નામ યે વા તવ મનુવિભવં ભાવયન્ત્યેતદમ્બ તેષામષ્ટૌ
કરસ્થાઃ પ્રકટિતરદને સિદ્ધયસ્ત્ર્યમ્બકસ્ય॥ ૪॥

વર્ગાદ્યં વહ્નિસંસ્થં વિધુરતિલલિતં તત્ત્રયં કૂર્ચયુગ્મં
લજ્જાદ્વન્દ્વં ચ પશ્ચાત્ સ્મિતમુખિ તદધષ્ઠદ્વયં યોજયિત્વા ।
માતર્યે યે જપન્તિ સ્મરહરમહિલે ભાવયન્તઃ સ્વરૂપં તે
લક્ષ્મીલાસ્યલીલાકમલદલદૃશઃ કામરૂપા ભવન્તિ॥ ૫॥

પ્રત્યેકં વા દ્વયં વા ત્રયમપિ ચ પરં બીજમત્યન્તગુહ્યં
ત્વન્નામ્ના
યોજયિત્વા સકલમપિ સદા ભાવયન્તો જપન્તિ ।
તેષાં નેત્રારવિન્દે વિહરતિ કમલા વક્ત્રશુભ્રાંશુબિમ્બે વાગ્દેવી
દેવિ મુણ્ડસ્રગતિશયલસત્કણ્ઠિ પીનસ્તનાઢ્યે॥ ૬॥

ગતાસૂનાં બાહુપ્રકરકૃતકઞ્ચીપરિલસન્નિતમ્બાં દિગ્વસ્ત્રાં

ત્રિભુવનવિધાત્રીં ત્રિણયનાં ।
શ્મશાનસ્તે તલ્પે શવહૃદિ મહાકાલસુરતપ્રયુક્તાં ત્વાં
ધ્યાયન્ જનનિ જડચેતા અપિ કવિઃ ॥ ૭॥

શિવાભિર્ઘોરાભિઃ શવનિવહમુણ્ડાસ્થિકરૈઃ પરં સંકીર્ણાયાં
પ્રકટિતચિતાયાં હરવધૂમ્ ।પ્રવિષ્ટાં ।
સંતુષ્ટામુપરિસુરતેનાતિયુવતીં સદા ત્વાં ધ્યાયન્તિ ક્વચિદપિ
ચ
ન તેષાં પરિભવઃ ॥ ૮॥

વદામસ્તે કિં વા જનનિ વયમુચ્ચૈર્જડધિયો ન ધાતા નાપીશો
હરિરપિ ન તે વેત્તિ પરમમ્ ।
તથાપિ ત્વદ્ભક્તિર્મુખરયતિ ચાસ્માકમમિતે તદેતત્ક્ષન્તવ્યં ન
ખલુ
પશુરોષઃ સમુચિતઃ ॥ ૯॥

સમન્તાદાપીનસ્તનજઘનધૃગ્યૌવનવતીરતાસક્તો નક્તં યદિ
જપતિ
ભક્તસ્તવ મનુમ્ ।
વિવાસાસ્ત્વાં ધ્યાયન્ ગલિતચિકુરસ્તસ્ય વશગાઃ સમસ્તાઃ
સિદ્ધૌઘા ભુવિ ચિરતરં જીવતિ કવિઃ ॥ ૧૦॥

સમાઃ સુસ્થીભૂતો જપતિ વિપરીતાં યદિ સદા વિચિન્ત્ય ત્વાં
ધ્યાયન્નતિશયમહાકાલસુરતામ્ ।
તદા તસ્ય ક્ષોણીતલવિહરમાણસ્ય વિદુષઃ કરામ્ભોજે વશ્યા
પુરહસ્વધૂ સિદ્ધિનિવહાઃ ॥ ૧૧॥

પ્રસૂતે સંસારં જનનિ ભવતી પાલયતિ ચ સમસ્તં ક્ષિત્યાદિ
પ્રલયસમયે સંહરતિ ચ ।
અતસ્ત્વં ધાતાસિ ત્રિભુવનપતિઃ શ્રીપતિરપિ મહેશોઽપિ પ્રાયઃ
સકલમપિ કિં સ્તૌમિ ભવતીમ્ ॥ ૧૨॥

અનેકે સેવન્તે ભવદધિકગીર્વાણનિવહાન્ વિમૂઢાસ્તે માતઃ કિમપિ
ન
હિ જાનન્તિ પરમમ્ ।
સમારાધ્યામાદ્યાં હરિહરવિરિઞ્ચ્યાદિવિબુધૈઃ પ્રપન્નોઽસ્મિ
સ્વૈરં
રતિરસસમહાનન્દનિરતામ્ ॥ ૧૩॥

ધરત્રિ કીલાલં શુચિરપિ સમીરોઽપિ ગગનં ત્વમેકા કલ્યાણી
ગિરિશરમણી કાલિ સકલમ્ ।
પ્રસન્નાં ત્વં ભૂયા ભવમનુ ન ભૂયાન્મમ જનુઃ ॥ ૧૪॥

શ્મશાનસ્થઃ સુસ્થો ગલિતચિકુરો દિક્પટધરઃ સહસ્રં ત્વકાર્ણાં
નિજગલિતવીર્યેણ કુસુમમ્  ।
જપંસ્ત્વત્પ્રયેકં મનુમપિ તવ ધ્યાનનિરતો મહાકાલિ સ્વૈરં સ
ભવતિ ધરિત્રીપરિવૃઢઃ ॥ ૧૫॥

ગૃહે સંમાર્જ્યન્યા પરિગલિતવિર્યં હિ ચિકુરં સમૂલં મધ્યાહ્ને
વિતરતિ ચિતાયાં કુજદિને ।
સમુચ્ચાર્ય પ્રમેણા મનુમપિ સકૃત્કાલિ સતતં ગજારૂઢો યાતિ
ક્ષિતિપરિવૃઢઃ સત્કવિવરઃ ॥ ૧૬॥

સ્વપુષ્પૈરાકીર્ણં કુસુમધનુષો મન્દિરમહો પુરો ધ્યાયન્ધ્યાયન્
યદિ જપતિ ભક્તસ્તવ મનુમ્ ।
સ ગન્ધર્વશ્રેણીપતિરપિ કવિત્વામૃતનદીનદીનઃ પર્યન્તે
પરમપદલીનઃ પ્રભવતિ ॥ ૧૭॥

ત્રિપઞ્ચારે પીઠે શવશિવહૃદિ સ્મેરવદનાં
મહાકાલેનોચ્ચૈર્મદનરસલાવણ્યનિરતામ્ ।
સમાસક્તો નક્તં સ્વયમપિ રતાનન્દનિરતો જનો યો ધ્યાયેત્ત્વામયિ
જનનિ સ સ્યાત્ સ્મરહરઃ ॥ ૧૮॥

સલોમાસ્થિ સ્વૈરં પલલમપિ માર્જારમસિતે પરં ચોષ્ટ્રં
મૈશં
નરમહિષયોશ્છાગમપિ વા ।
બલિમ્ તે પૂજાયામયિ વિતરતાં મર્ત્યવસતાં સતાં સિદ્ધિઃ
સર્વા
પ્રતિપદમપૂર્વા પ્રભવતિ ॥ ૧૯॥

વશી લક્ષં મન્ત્રં પ્રજપતિ હવિષ્યાશનરતો દિવા
માતર્યુષ્મચ્ચરણયુગલધ્યાનનિપુણઃ ।
પરં નક્તં નગ્નો નિધુવનવિનોદેન ચ મનું જપેલ્લક્ષં સ સ્યાત્
સ્મરહરસમાનઃ ક્ષિતિતલે ॥ ૨૦॥

ઇદં સ્તોત્રં માતસ્તવ મનુસમુદ્ધારણજનુઃ સ્વરૂપાખ્યં
પાદામ્બુજયુગલપૂજાવિધિયુતમ્ ।
નિશાર્ધં વા પૂજાસમયમધિ વા યસ્તુ પઠતિ પ્રલાપસ્તસ્યાપિ

પ્રસરતિ કવિત્વામૃતરસઃ ॥ ૨૧॥

કુરઙ્ગાક્ષીવૃન્દં તમનુસરતિ પ્રેમતરલં વશસ્તસ્ય ક્ષોણીપતિરપિ
કુબેરપ્રતિનિધિઃ ।
રિપુઃ કારાગારં કલયતિ ચ તં કેલિકલયા ચિરં જીવન્મુક્તઃ
પ્રભવતિ સ ભક્તઃ પ્રતિજનુઃ ॥ ૨૨॥

ઇતિ શ્રીમન્મહાકાલિવિરચિતં શ્રીમદ્દક્ષિણકાલિકાયાઃ
સ્વરૂપાખ્યં સ્તોત્રં સમાપ્તમ્

Encoded by Mike Magee (mike.magee@theregister.co.uk)

.. KarpUradistotra ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*